13

1075CH13

# मिश्रिताभ्यासः

## अभ्यासः I

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत—**

पठनम् अतीव अरुचिकरं मन्यमानः सुवीरः हतोत्साहः भूत्वा कक्षस्य एकस्मिन् कोणे विचारमग्नः अतिष्ठत् । तस्य मनसि असफलतायाः कारणात् आत्मघातस्य भावना जागृता । दुःखितः भूत्वा आत्मचिन्तनं कुर्वन् सः भित्तिम् आरोहन्तम् एकं पिपीलकं पश्यति, यः पुनः पुनः पतित्वा अपि हतोत्साहितः न भवति, अपि तु सततं प्रयासेन सः अन्ततः भित्तिम् आरोहति तत्रस्थं मिष्टान्नं च प्राप्नोति । तस्य विवेको जागृतो भवति । आत्मनः आत्मघातस्य भावनां निन्दयन् सः चिन्तयति यत् यद्येष पिपीलकः सततप्रयासेन सफलः भवितुं शक्नोति तर्हि न किमपि असम्भवं जगति । एतद्विचिन्त्य सः पठनस्य पुनः पुनरभ्यासं कुर्वन् कक्षायां विशिष्टं स्थानं प्राप्तवान् । तस्मिन् एतत् परिवर्तनं दृष्ट्वा शिक्षकः तस्य प्रशंसां कुर्वन् बोधयति— "वत्स! वीरभोग्या वसुन्धरा । वसुधायां बहूनि वस्तूनि सन्ति परन्तु परिश्रमशीलाः वीराः एव तानि प्राप्नुवन्ति ।"

© NCERT not to be republished

### अभ्यासः

**(i) एकपदेन उत्तरत —**

(क) कः हतोत्साहः अभवत्? ..........................................

(ख) असफलतायाः कारणात् सुवीरस्य मनसि कस्य भावना जागृता?

..........................................

(ग) पिपीलकः भित्तौ किं प्राप्नोति? ..........................................

(घ) सुवीरः पुनः पुनरभ्यासेन किं स्थानं प्राप्तवान्? ..........................................

**(ii) पूर्णवाक्येन उत्तरत —**

(क) सुवीरः आत्मघातस्य भावनां निन्दयन् किं चिन्तयति?

..........................................

(ख) के वसुधायां वसूनि प्राप्नुवन्ति?

..........................................

**(iii) यथानिर्देशम् उत्तरत —**

(क) 'स: अन्तत: भित्तिम् आरोहति'- अत्र किम् अव्यय-पदम्?

........................................................................................................

(ख) 'संसारे' इति पदस्य किं समानार्थकपदम् अनुच्छेदे प्रयुक्तम्?

........................................................................................................

(ग) 'तस्य विवेक: जागृत: अभवत्'- अत्र किं कर्तृपदम्?

........................................................................................................

(घ) 'वसुधायां बहूनि वसूनि सन्ति'- अत्र किं विशेषणपदम्?

........................................................................................................

**2. 'आत्मघात: कस्या: अपि समस्याया: समाधानं न भवति' एतद्विषयम् अधिकृत्य एकम् लघुम् अनुच्छेदं लिखत —**

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

**3. 'पठनस्य के लाभा:' - इति वर्णनं कुर्वन्त: मित्रं प्रति पत्रमेकं लिखत —**

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

........................................................................................................

**4. सन्धिच्छेद: सन्धि: वा क्रियताम् —**

(i) हतोत्साह: ........................+........................

(ii) विवेक:+जागृत: ........................................



© NCERT not to be republished

(iii) स:+अन्तत: ..........+..........

(iv) एतद्विचिन्त्य ..........

**5. समासं विग्रहं वा कृत्वा वाक्यानि पुन: लिखत—**

(i) सुवीर: <u>हत: उत्साह: यस्य स:</u> भूत्वा एकस्मिन् कोणे तिष्ठति।

..........

(ii) तस्य मनसि <u>आत्मघातस्य</u> भावना जागृता।

..........

(iii) स: अभ्यासं कुर्वन् कक्षायां <u>विशिष्टं स्थानं</u> प्राप्तवान्।

..........

(iv) वत्स! <u>वीरै: भोग्या</u> वसुन्धरा।

..........

**6. उचित-प्रत्ययप्रयोगेण रिक्तस्थानानि पूरयत—**

(i) पठनम् अरुचिकरं .......... (मन्+शानच्) छात्रा: सफला: न भवन्ति।

(ii) सततप्रयासेन मन्दोऽपि सफल: .......... (भू+तुमुन्) शक्नोति।

(iii) अस्मिन् वर्षे अहम् कक्षायां विशिष्टं स्थानं ..........। (प्र+आप+क्तवतु)

(iv) पुन: पुन: पतित्वा अपि हतोत्सहित: न ..........। (भू+तव्यत्)

**7. प्रदत्तवाक्यानां वाच्यपरिवर्तनम् कृत्वा लिखत—**

(i) सुवीर: एकस्मिन् कोणे तिष्ठति।

..........

(ii) पिपीलक: अन्तत: भित्तिम् आरोहति।

..........

(iii) शिक्षकेण तस्य प्रशंसा क्रियते।

..........

(iv) परिश्रमशीलै: वीरै: एव वसूनि प्राप्यन्ते।

..........

**8. प्रदत्तवाक्यानां संस्कृतभाषया अनुवादं कुरुत—**

(i) उसका विवेक जागृत हो जाता है।

..........

(ii) उसने वृक्ष पर चढ़ते हुए साँप को देखा।

..........

© NCERT not to be republished

(iii) हमें पुन: पुन: पाठों का अभ्यास करना चाहिए।

............................................................................................................

(iv) मुझे पढ़ना अच्छा लगता है।

............................................................................................................

**9. प्रदत्तानि वाक्यानि शुद्धानि कृत्वा पुन: लिखत—**

(i) बालक: एकस्मिन् कोणे तिष्ठति। ..............................................

(ii) स: भित्तिम् आरोहन्तं पिपीलकं पश्यति। ..............................................

(iii) वसुधायां बहूनि वसूनि सन्ति। ..............................................

(iv) अहम् उत्साहित: भूत्वा तत्रागच्छम्। ..............................................

## अभ्यास: II

**1. लिखितमनुच्छेदं पठित्वा निर्देशानुसारं प्रश्नान् उत्तरत—**

वयं सर्वे सुखम् इच्छाम: । कोऽपि दु:खं नैव इच्छति । अत: दु:खानां विनाश: कथं भवति, इति ज्ञातव्यम्। गीतायाम् अर्जुनं प्रति श्रीकृष्ण: अकथयत्, "प्रसादे सर्वदु:खानां हानिरस्योपजायते ।" अत: सर्वेषां दु:खानाम् अभावस्य कृते मनस: प्रसन्नता अत्यावश्यकी वर्तते । विपरीतपरिस्थितिषु ये धैर्यं न त्यजन्ति ते सर्वदा आन्तरिक-प्रसन्नताया: माध्यमेन प्रतिकूलपरिस्थिती: विरुध्य विजयम् अधिगच्छन्ति। प्रियजनस्य रुग्णतायां ये सेवां कृत्वा प्रसन्ना: भवन्ति ते न केवलम् प्रियजनस्य दु:खस्य अपि तु स्वदु:खस्य अपि विनाशं कृत्वा भूयोऽपि प्रसन्ना: भवन्ति, परन्तु ये आत्मन: परस्य वा रोगं, समस्यां वा दृष्ट्वा केवलं हाहाकारं कुर्वन्ति तेषां दु:खेषु वृद्धि: एव भवति। अत: विषाद: कदापि न कर्तव्य: प्रसन्नता च कदापि न त्याज्या।

**(i) एकपदेन उत्तरत —**

(क) प्रसादे केषां हानि: भवति? ..............................................

(ख) ये समस्यायां प्राप्तायां केवलं हाहाकारं कुर्वन्ति तेषां दु:खेषु किं भवति?

..............................................

**(ii) पूर्णवाक्येन उत्तरत —**

(क) प्रतिकूलपरिस्थिती: विरुध्य के विजयम् अधिगच्छन्ति?

............................................................................................................

(ख) किं कदापि न कर्तव्यं किम् च न त्याज्यम्?

............................................................................................................

**(iii) निर्देशानुसारम् उत्तरत —**

(क) 'पराजयम्' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम्?

..........................................................................................

(ख) 'तेषाम् दु:खेषु वृद्धि: भवति' इति वाक्यांशे 'भवति' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

..........................................................................................

(ग) 'सर्वेषाम्' इति सर्वनामपदम् अत्र कस्मै प्रयुक्तम्?

..........................................................................................

(घ) 'स्वस्य' इति पदस्य किं पर्यायपदम् अत्र आगतम्?

..........................................................................................

**(iv) गद्यांशस्य कृते समुचितं शीर्षकं लिखत।**

..........................................................................................

**2. प्रसन्नताया: महत्त्वविषये पञ्चवाक्यमितम् अनुच्छेदं सरलसंस्कृतेन लिखत-**

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

**3. गृहे पितु: रुग्णताया: कारणेन भवत:/भवत्या: मित्रम् दु:खित: अस्ति। तं सान्त्वयन्त: पत्रमेकं सरलसंस्कृतेन लिखत—**

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

..........................................................................................

© NCERT not to be republished

**4. अधोलिखितवाक्येषु रेखांकितपदानि अधिकृत्य सन्धिं/सन्धिविच्छेदं कुरुत—**

(i) हाहाकारेण तु दुःखेषु वृद्धिः+एव भवति। ..........................

(ii) मनसः प्रसन्नता तु अत्यावश्यकी। .................. + ..................

(iii) कः + अपि दुःखं नैव इच्छति। ..........................

(iv) विषादः कदापि न कर्तव्यः। .................. + ..................

(v) वृद्धानां सेवां कृत्वा प्रसन्नो भव। .................. + ..................

(vi) वयं सर्वे सुखम्+इच्छामः। ..........................

**5. रेखांकितपदानां समस्तपदं विग्रहं वा कृत्वा वाक्यानि पुनः लिखत—**

(i) दुःखानां विनाशः कथं भवति इति ज्ञातव्यम्।

..........................................................................

(ii) नीतिषु लाभालाभौ न विचारणीयौ।

..........................................................................

(iii) दुःखानाम् अभावः मनसः प्रसन्नतायै आवश्यकः।

..........................................................................

**6. उचितप्रत्ययप्रयोगेण रिक्तस्थानानि पूरयत—**

(i) दुःखानां विनाशस्य उपायं ज्ञा + तव्यत्। ..........................

(ii) प्रियजनस्य रुग्णता दुःखदायिका। .................. + ..................

(iii) रोगं दृष्ट्वा केवलं हाहाकारं न कर्तव्यम्। .................. + ..................

(iv) त्वं प्रतिकूलपरिस्थितीं वि+रुध्+ल्यप् विजयं प्राप्नुहि। .................. + ..................

**7. प्रदत्तवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखत—**

(i) गीतायां श्रीकृष्णः अर्जुनं प्रति कथयति।

..........................................................................

(ii) वयं सर्वे सुखम् इच्छामः।

..........................................................................

(iii) विनम्रजनः पितरं सेवते।

..........................................................................

(iv) पुत्रेण औषधैः पितुः रोगविनाशस्य प्रयत्नः क्रियते।

..........................................................................



2024-25

© NCERT not to be republished